श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ५९

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ५९

*वेणुगानवर्णनम्*

त्वद्वपुर्नवकलायकोमलं
    प्रेमदोहनमशेषमोहनम्।
ब्रह्म तत्त्वपरचिन्मुदात्मकं
    वीक्ष्य सम्मुमुहुरन्वहं स्त्रियः॥ १॥

मन्मथोन्मथितमानसाः क्रमा-
    त्त्वद्विलोकनरतास्ततस्ततः।
गोपिकास्तव न सेहिरे हरे
    काननोपगतिमप्यहर्मुखे॥ २॥

निर्गते भवति दत्तदृष्टय-
    स्त्वद्गतेन मनसा मृगेक्षणाः।
वेणुनादमुपकर्ण्य दूरत-
    स्त्वद्विलासकथयाऽभिरेमिरे॥ ३॥

काननान्तमितवान् भवानपि
    स्निग्धपादपतले मनोरमे।
व्यत्ययाकलितपादमास्थितः
    प्रत्यपूरयत वेणुनालिकाम्॥ ४॥

मारबाणधुतखेचरीकुलं
    निर्विकारपशुपक्षिमण्डलम्।
द्रावणं च दृषदामपि प्रभो
    तावकं व्यजनि वेणुकूजितम्॥ ५॥

www.prapatti.com

वेणुरन्ध्रतरलाङ्गुलीदलं
तालसञ्चलितपादपल्लवम्।
तत् स्थितं तव परोक्षमप्यहो
संविचिन्त्य मुमुहुर्व्रजाङ्गनाः॥ ६ ॥

निर्विशङ्कभवदङ्गदर्शिनीः
खेचरीः खगमृगान् पशूनपि।
त्वत्पदप्रणयि काननं च ताः
धन्यधन्यमिति नन्वमानयन्॥ ७ ॥

आपिबेयमधरामृतं कदा
वेणुभुक्तरसशेषमेकदा।
दूरतो बत कृतं दुराशये-
त्याकुला मुहुरिमाः समामुहन्॥ ८ ॥

प्रत्यहं च पुनरित्थमङ्गना-
श्चित्तयोनिजनितादनुग्रहात्।
बद्धरागविवशास्त्वयि प्रभो
नित्यमापुरिह कृत्यमूढताम्॥ ९ ॥

रागस्तावज्जायते हि स्वभावा-
न्मोक्षोपायो यत्नतः स्यान्न वा स्यात्।
तासां त्वेकं तद्द्वयं लब्धमासीत्
भाग्यं भाग्यं पाहि मां मारुतेश॥ १० ॥

**********